International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 155-160
© 2023 IJSR
www.anantaajournal.com
Received: 09-03-2023
Accepted: 12-04-2023

**Rajib Hossain**
M.A in Sanskrit, Raiganj University, Raiganj, West Bengal, India

**Corresponding Author:**
**Rajib Hossain**
M.A in Sanskrit, Raiganj University, Raiganj, West Bengal, India

# उपनिषत्सु पुरुषस्वरूपम्

**Rajib Hossain**

**सारांश**
भारतीयपरम्परायामुपलभमानासु उपनिषत्सु आत्मनः पर्यायवाचित्वेन पुरुषपदस्य प्रयोगोऽसकृत्प्राप्यते। पुरि शेते' इति व्युत्पत्या पुरुषपदं निष्पद्यते। सांख्ये आत्मा पुरुषः' इति पदेन अभिधीयते। वृहदारण्यकोपनिषदि याज्ञवल्क्येन सह कौषीतिकीपुत्रस्य कहोलस्य संवादे शोकमोहजरामृत्युप्रभृतिभ्योऽसंलग्नोऽपराऽन्तरात्मा उपदिष्टः। वृहदारण्यकस्य ३/७ – श्लोके उद्दालकाऽरुणिभ्यां सह याज्ञवल्कस्य संवादे सुत्रान्तर्यामिनोः परस्परं भेदः चर्चितः। तत्र सूत्रपदेन प्रकृत्याऽभिहितौ स्थावरः चरिष्णुश्च अनुसृतौ। तयोः नियन्ता परमात्मा इत्युच्यते, याज्ञवल्कः तं परमात्मानं आत्मन्तर्याम्यमृतः इति पदेन व्यपदिदेश। श्वेताश्वतरोपनिषदि उच्यते परमात्मानं ज्ञातुं सदा प्रयत्नः कर्तव्यः। तदपेक्षया उत्कृष्टः कोऽपि नास्ति। संसारे त्रीणि तत्त्वानि निर्दिष्टानि – भोक्ता, भोग्यः कर्ता च। भोक्ता भवति जीवात्मा, भोग्या प्रकृतिः, प्रेरिता च परमात्मा। एते त्रयः समुदिता एव सर्वेषां शासकः, प्रकाशस्वरूपः, अविनाशी च। ब्रह्मविन्दूपनिषदि आत्मनः लोकालोकगमनोपाधिस्वरूपेण पुरुषः निर्दिष्टः। यथा सर्वव्यापिनि आकाशे गतिः न भवति परन्तु घटादीनां उपाधीनां गतिः तस्मिन् उपचरिता भवति तथैव नभोपमस्थितिः जीवात्मनः पुरुषस्यापि कठोपनिषदि उच्यते आत्मा जरामृत्युरहितः, नित्यश्च। न च जन्यः न वा जनकः अतः अजः नित्यश्च। शरीरे विनष्टेऽपि आत्मा अविनाशी एव। देहिनः देहे नष्टे यदवशिष्यते स एव आत्मा। (अशुद्धेन जगता सह सम्पर्कात् जीवात्मनः मलीनत्वं प्रतीयते। परमात्मना सह सम्पर्के सति स शुद्धो भवति। यथा शुद्धं जलं अशुद्धे पतति अशुद्धमेव भवति तथैव जीवात्माऽपि देहिनः संस्पर्शेन मलीनः भवति परन्तु परमात्मनः संस्पर्शात् शुद्धः भवति।)

**कूटशब्दः** पुरुषः, उपनिषत्, जीवात्मा, परमात्मा, श्वेताश्वेतरोपनिषद्, बृहदारण्यकोपनिषद्, ब्रह्मविन्दूपनिषद्, ब्रह्मजिज्ञासुः, सुबालोपनिषद्, मण्डलब्राह्मणोपनिषद्, ईश्वरः. मैत्रायण्युपनिषद्, सांख्यसूत्रम्, पैङ्गलोपनिषद्।

## प्रस्तावना

भारतीयपरम्परायामुपलभमानासु उपनिषत्सु आत्मनः पर्यायवाचित्वेन पुरुषपदस्य प्रयोगोऽसकृत्प्राप्यते। 'पुरि शेते' इति व्युत्पत्या पुरुषपदं निष्पद्यते। सांख्ये आत्मा 'पुरुषः' इति पदेन अभिधीयते।

उपनिषत्सु बहुत्र सांख्योक्तः पुरुषः आलोचितः। छान्दोग्योपनिषदि उच्यते आत्मा धर्माधर्मोपाधिशून्यः, विजरः, मृत्युशून्यः, शोकरहितः भोगेच्छाविहीनः, पिपासारहितश्च।[1] अन्यत्र उपनिषत्सु उच्यते यत् षोडशकलोपेताऽत्मा।[2] 'जीवोपेतं वाव किलेदं म्रियते न जीवो

म्रियते'[3] इत्यत्र उच्यते शरीरं विनाशी तथा जीवात्मा तु अविनाशी। तथैव 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति'[4] इत्यत्र आत्मना सह जीवपदस्य प्रयोगः अभूत्। तथैव 'भागो जीवः स विज्ञेयः स चानन्त्याय कल्प्यते'[5] इत्यत्र आत्मने जीवपदस्य प्रयोगः बभूव। श्वेताश्वतरोपनिषदि गद्यते जीवात्मा नित्यः स्वतन्त्रश्च –

**सर्वाजीवो सर्वग्रन्थे वृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।[6]**

अत्रोच्यते जीवात्मा हंसस्वरूपः स ब्रह्मचक्रे भ्रमति। स नवद्वारविशिष्टे देहकल्पपुर्यां निवसति[7], यतः स भोक्ता अतः स संसारे आबद्धो भवति।[8]

वृहदारण्यकोपनिषदि अपि सांख्यानुसारं 'असङ्गोऽह्ययं पुरु'इत्युक्त्वा पुरुषस्य असङ्गत्वम् अपरिणामित्वं च निरूपितम्।[9] इतरत्र प्रकृतेः तज्जन्यपदार्थानाञ्च भोग्यत्वेन पुरुषः निर्दिष्टः।[10] अन्यत्र च संहतत्वात् परार्थोपपत्तिः वर्णिता।[11] अयं स्वरूपः वृहदारण्यकशाङ्करभाष्ये 'संहत परार्थत्वयुक्तिः पूर्वाचार्यैः बहुत्र प्रयुक्ताः' ३/९/२६ इत्यत्र अस्ति। वस्तुतस्तु भोक्तारम् आत्मानं विहायाऽपराऽभोक्ता चेतनात्मा अपि विद्यते। ऋग्वेदे 'अनश्नन्नन्यो अभिचाकषीति'[12] इत्यादौ भोक्तारमात्मानं विहाय अभोक्ता चेतनः सदा दीप्यमानः अन्यः आत्मा निर्दिष्टः, अयं परमात्मापदेन व्यपदिष्टेः। प्रकृतिः प्रकृतिजातं तत्त्वं च चेतनस्यैव अनुमापकम् परन्तु अत्र प्रसङ्गे भोक्तृभोग्यभावम् उपेक्ष्य नियम्यनियन्तृभावः आध्रियते। प्रकृतिः तज्जातं तत्त्वं च परमात्मना एव नियम्यते। नियम्यायाः प्रकृतेरेव नियन्ता अनुमीयते।

वृहदारण्यकोपनिषदि याज्ञवल्क्येन सह कौषीतिकीपुत्रस्य कहोलस्य संवादे शोकमोहजरामृत्युप्रभृतिभ्योऽसंलग्नोऽपराऽन्तरात्मा उपदिष्टः।[13] अस्मिन् प्रसङ्गे द्वन्द्वातीतं ब्रह्म उपासको जीवात्मा च वर्णितौ। वृहदारण्यकस्य ३/७ – श्लोके उद्दालकाऽरुणिभ्यां सह याज्ञवल्कस्य संवादे सुत्रान्तर्यामिनोः परस्परं भेदः चर्चितः। तत्र सूत्रपदेन प्रकृत्याऽभिहितौ स्थावरः चरिष्णुश्च अनुस्युतौ। तयोः नियन्ता परमात्मा इत्युच्यते, याज्ञवल्कः तं परमात्मानं 'आत्मन्तर्याम्यमृतः'इति पदेन व्यपदिदेश।

ब्रह्मविन्दूपनिषदि आत्मनः लोकालोकगमनोपाधिस्वरूपेण पुरुषः निर्दिष्टः। यथा सर्वव्यापिनि आकाशे गतिः न भवति परन्तु घटादीनां उपाधीनां गतिः तस्मिन् उपचरिता भवति तथैव नभोपमस्थितिः जीवात्मनः पुरुषस्यापि। इदमेव तत्वं गीतायां उपस्थापितम् - 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः'इत्यादिना श्लोकेन।[14]

प्रश्नोपनिषदि उच्यते चेतनः पुरुषः षोडशकलोपेतः।[15] अत्र षोडशकलया मनःसहितानि एकादश इन्द्रियाणि पञ्चतन्मात्रोपेतं लिङ्गशरीरं च गृह्यन्ते। अयमात्मा प्रश्नोपनिषदि द्रष्टा-श्रोता-घ्राता-रसयिता-मन्ता-बोद्धा-कर्ता-विज्ञानरूपैः उपदिष्टः।[16]

श्वेताश्वेतरोपनिषदि[17] सर्वज्ञोऽनादिः परमात्मा, अल्पज्ञो भोक्ता जीवो भोगसम्पादयित्र्याः अनादेः प्रकृतेः च त्रयाणां समुदितरूपेण वर्णितः। भोक्ता आत्मा अनन्ताः अतः नाना देहादिधारणत्वात् स जगतः अकर्ता इत्युच्यते। एते त्रयः एव अनादयः, द्वयोः वर्गयोः समाविष्टाः सन्ति, एकः चेतने आत्मनि अपरश्च अचेतने प्रधाने। श्वेताश्वतरोपनिषदि उच्यते परमात्मानं ज्ञातुं सदा प्रयत्नः कर्तव्यः। तदपेक्षया उत्कृष्टः कोऽपि नास्ति। संसारे त्रीणि तत्त्वानि निर्दिष्टानि – भोक्ता, भोग्यः कर्ता च। भोक्ता भवति जीवात्मा, भोग्या प्रकृतिः, प्रेरिता च परमात्मा। एते त्रयः समुदिता एव सर्वेषां शासकः, प्रकाशस्वरूपः, अविनाशी च। स एव सत्त्वादीनां गुणानां प्रवर्तकः।[18] अस्यामुपनिषदि चतुर्थाऽध्याये अनेकरूपात्मकस्य[19] जीवात्मनः तथा परमात्मनश्च[20] वर्णनमुपलभ्यते। परमात्माजीवात्मनोश्च भेदः अपि उपदिष्टः।[21] अयं भेदः श्वेताश्वतरोपनिषदि, ४/९ मन्त्रे उपदिष्टः यथा – 'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चासौ मायया संनिरूद्धः'। अर्थात् परमात्मा सम्पूर्णं जगत् सृजति जीवात्मा च मायया बध्नाति। अत्र 'मायपदं' त्रिगुणात्मकाय प्रधानायोपदिष्टम्। तस्य नियन्ता अधिष्ठाता च परमात्मा एव। अयमेव भावः श्वेताश्वतरे ४/१०-मन्त्रे 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इत्यादिना मन्त्रेण प्रकटितः। वस्तुतस्तु परमात्मा सर्वेषाम् अधिष्ठाता। अतः जगतः प्रत्येकं सूक्ष्मातिसूक्ष्मेषु विषयेषु उपादानभूतेषु परमाणुष्वपि स एव नियन्ता। तस्य एव शक्तेः प्रभावात् जगतः सृष्टिप्रलयादीनि भवन्ति। तमेवैश्वर्यसम्पन्नं वन्दनीयं देवं विज्ञाय शान्तिमाप्नुवन्ति जनाः।[22]

श्वेताश्वतरोपनिषदि ५/१-६ पर्यन्तं मन्त्रेषु परमात्मा व्याचष्ट। स एकः एव अखिलविश्वस्य पालकः। स एव सर्वेषां गुणानां विनियोजकः।[23]

श्वेताश्वतरोपनिषदि ३/१२ मन्त्रे उच्यते यत् जीवात्मा सत्त्वादिभिः गुणैः सम्पृक्तः सन् नानाकार्याणि सम्पादयति तत् कर्मफलं च भुनक्ति। जीवात्मनः अनेकत्वात् स नाना देहेषु संचरति अतः स्वकृतकर्मफलानुसारं जन्ममृत्योः चक्रे आवर्तते।[24]

श्वेताश्वतरोपनिषदि परमात्मा 'गुणी'[25], 'गुणेशः' च प्रोक्तः। इतोऽपि 'प्रधानक्षेत्राधिपतिः' इत्यप्युच्यते। अस्य तात्पर्यं तावत् परमात्मा त्रयाणां गुणानां प्रधानस्य क्षेत्रज्ञस्य अर्थात् जीवात्मनः च नियन्ता, परन्तु स्वयं निर्गुणाधिकारी। स त्रिभ्यः गुणेभ्यः सर्वदा निर्लिप्तः तिष्ठति। यतः स स्वयं निर्गुणः।[26] परमात्मानं विज्ञातुं प्रयोजनानि साधनानि सांख्ययोगे आख्यातानि।[27]

श्वेताश्वेतरोपनिषदि निरूपितं यत् व्यक्तात् जगतः अव्यक्तात् बीजरूपात् प्रधानात् च एताभ्यां रूपद्वयाभ्यां समुपेतः परमात्मा जगतः धारकः।[28] अनेन स्पष्टं यत् ईश्वरः जीवात्मनः पृथगेव। जीवात्मा अपि ईश्वरात् पृथगेव यतो हि स त्रिभिः गुणैः आबद्धः सन् स्वयं प्रकृतिजान् भुनक्ति, ईश्वरस्तु सदा भोक्तृभावात् विस्पृष्ट एव तिष्ठति। अहंकाराविष्टः सन् जीवात्मा यदाऽत्मानं भोक्तृत्वेन अभिमन्यते तदा ईश्वरस्तु आत्मनः कूटस्थे भावे स्थिरस्तिष्ठति।

श्वेताश्वतरोपनिषदः प्रारम्भे ब्रह्मजिज्ञासुः पृच्छति अस्य् जगतः कारणं किम् ? इदं कुतः समुद्भूतम्? कस्माच्च जीविताः वयम्? प्रलयकाले अस्माकं स्थितिः कीदृशी भवति? प्रलयकाले वयं कुत्र भविष्यामः? कः च अस्माकं नियन्ता?[29] एतेषां प्रश्नानां समाधानम् अस्यामुपनिषदि प्राप्यते। ब्रह्मवादिन एताः समस्या विज्ञातुं चिचेष्टे। ते योगेन जगद्रहस्यं जज्ञिरे, एकस्य चेतनदिव्यशक्तेश्च सान्निध्यं प्रापुः, या शक्तिः स्वगुणैः आवृता बभूव। ते गुणाः जगदुपादानभूतानि सत्त्वरजस्तमांसि। एतेषां सर्वेषां कारणानां जीवात्मनां च अधिष्ठाता स परमात्मा एव। स एव दिव्यश्चेतनः परमात्मा प्रकृतिपुरुषयोः नियन्ता।[30]

कठोपनिषदि उच्यते आत्मा जरामुत्युरहितः, नित्यश्च। न च जन्यः न वा जनकः अतः अजः नित्यश्च। शरीरे विनष्टेऽपि आत्मा अविनाशी एव।[31] देहिनः देहे नष्टे यदवशिष्यते स एव आत्मा।[32] अशुद्धेन जगता सह सम्पर्कात् जीवात्मनः मलीनत्वं प्रतीयते। परमात्मना सह सम्पर्के सति स शुद्धो भवति। यथा शुद्धं जलं अशुद्धे पतति अशुद्धमेव भवति तथैव जीवात्माऽपि देहिनः संस्पर्शेन मलीनः भवति परन्तु परमात्मनः संस्पर्शात् शुद्धः भवति।[33] अस्यामेव उपनिषदि उच्यते एकादशेन्द्रियात्मके शरीरे जीवात्मा वसति।[34]

कठोपनिषदि उच्यते जीवात्मा हंससमानः। यथा हंसः शुद्धे पवित्रे स्थले तिष्ठति तथैव जीवात्मा शुद्धे ब्रह्मणि निवसति। जीवात्मा वसुः। यथा वसुः अन्तरिक्षे निवसति तथैव जीवात्मा हृद्रूपे अन्तरिक्षे निवसति। कठोपनिषदि उच्यते जीवात्मा अतिथिः। यथा अतिथिः आश्रयदातुः गृहे चिरं न तिष्ठति किञ्चित्कालं विश्रम्य प्रतिष्ठते तथैव जीवात्मा देहात् देहान्तरं विचरति।[35] 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुमनीषिणः'[36] कठोपनिषदोऽस्मिन् मन्त्रे मनसा इन्द्रियेण च सम्पृक्तं पुरुषं भोक्तेत्युच्यते। अन्यत्र च पुरुषं शब्दशून्यः, विरूपः अस्पृष्टः, अविनाशी, स्वादविहीनःअनदीत्यादि वदति इतोऽपि उच्यते यत् जीवात्मा अनन्तः, कूटस्थः महतः परः च।[37]

मुण्डकोपनिषदि आत्मापरमात्मनोः सर्वथा भिन्नरूपेण अलंकरणं कृतम्। एकस्मिन् वृक्षे स्थितयोः द्वयोः पक्षिणोः एकः वृक्षस्य फलं भुङ्क्ते अपरो न भुञ्जनपि सदा प्रकाशते। तत्र जीवात्मापरमात्मनोर्वर्णनमित्थं विद्यते –

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥**[38]

अत्र जीवात्मापरमात्मनोः पक्षीत्वेन कल्पना कृता प्रकृतेश्च वृक्षत्वेन। जीवात्मापरमात्मनोः साम्यं तयोः चैतन्यस्वरूपमाधृत्यैव। जीवात्मा प्रकृतेः भोक्ता, अतः प्रकृत्या सह जीवात्मनः भोग्यभोक्तृत्वसम्बन्धः। परमात्मना प्रचोदिता प्रकृतिरिदं जगत् सृजति, अतः प्रकृत्या सह तस्य प्रेर्यप्रेरकत्वसम्बन्धः। एवमुपर्युक्तायां कारिकायामीश्वरजीवप्रकृतीनां पृथग् सत्ता सुव्यक्ता।

अस्यामुपनिषद्यन्यत्र जीवात्मानं परमात्मापर्यन्तं प्रापयितुं एकं रूपकम् उपस्थापितम् – प्रणवो धनुः शर आत्मा ब्रह्म च लक्ष्यं भवति आत्मा ब्रह्माणं विद्धि चेत् शरवत् तन्मयो भवति।[39] अत्र जीवात्मा उपासको भवति परमात्मा उपास्यः प्रणवश्च उपासनायाः साधनं भवति। अन्यत्रापि अस्यामुपनिषदि प्रणवस्योपासनात्वमालोचितम्। तस्य साक्षात्कारे सति आनन्दस्वरूपस्य परमात्मनः अपि दर्शनं भवति।[40]

मण्डलब्राह्मणोपनिषदि प्रकृत्या सह त्रयोविंशतेर्विकाराणामुपस्थापनाऽनन्तरं पञ्चविंशं तत्त्वमुक्तं जीवात्मेति। अत्र तु चतुर्विंशतीनां तत्त्वानुमुपस्थापनं सांख्यानुसारमेव। जीवात्मापरमात्मनोः क्रमेण तयोः पञ्चविंशतत्त्वत्वं षड्विंशतत्त्वञ्च प्रतिपादनात् तयोः पृथक् सत्ता प्रमाणितेत्यत्र नास्ति कश्चन संशयः। सुबालोपनिषदि उच्यते आत्मनः निवासः हृदयान्तर्वर्ती लोहितमांसपिण्डे। स च रात्रौ विकासमानं कमलवत् श्वेतवर्णीयो भवति। स बहुधा विकसिता भवति। हृदयपुण्डरीकेषु प्राणाः तिष्ठन्ति।[41] अस्यामुपनिषद्युच्यते हृदयान्तर्वर्ती आत्मा अजः नित्यश्च।[42] केनोपनिषदि[43] 'अन्यदेव तद्विदितादथो ताविदितादधि' इत्यादिना प्रतिपाद्यते पुरुषः विदिताऽविदितयोः परः। मैत्रायण्युपनिषदि 'तानि ह वा एतानि गुणानि पुरुषेणेरितानि चक्रमिव मृत्युवेनेति' इत्यादौ कर्मफलैरनभिभूतस्य, शुद्धस्य, स्थिरस्य, अचलस्य,

निस्पृहस्य परमात्मनो निर्देशो विद्यते, स च एक एव अखिलं संसारं व्याप्य विराजते। तस्य शरीरबन्धनाऽभावात् तस्मिन् कर्तृत्वभोक्तृत्वादीनामपि अभावो भवति, परन्तु जगत्सर्वं प्रति तस्य कर्तृत्वमस्ति। चेतनस्य प्रेरणां विना सत्त्वादयः स्वतो न प्रवर्तन्ते। स्थूलशरीरेषु जीवचेतनयोः प्रेरकः, समष्टिशक्त्या च अखिलस्य ब्रह्माण्डस्य च प्रेरकः स अन्तर्यामी परमत्मा एव।

मैत्रायण्युपनिषदि पुरुषः द्विधोलभ्यते। एकः अभोक्ता, अमन्ता, अश्रोता, अद्रष्टा, अवक्ता, अघ्राता मुक्तः पुरुषः। अपरस्तु भोक्ता, मन्ता, श्रोता, वक्ता, घ्राता, द्रष्टा बद्धः पुरुषः।[44] मैत्रायण्युपनिषद्युच्यते पुरुषः सूक्ष्मः, अग्राह्यः, अदृश्यः, क्षेत्रज्ञः, अध्यवसायः संकल्पवांश्च। अस्यैव चेतनशक्त्या शरीरं चेतनवत् भाति। अयमेव पुरुषः चेतनप्राणिषु जीवात्मारूपेण विराजते। अयमेव पुरुषः सर्वासां क्रियाणां प्रचोदकः।

मैत्रायण्युपनिषदि उच्यते यत् पुरुषः शुभाऽशुभेषु कर्मफलेषु आबद्धः सन् विभिन्नेषु शरीरेषु संचरति परन्तु तत्त्वतः स अव्यक्तः, सूक्ष्मः, अदृश्यः, आग्राह्यः, अहंकाररहितश्च। तस्मिन् यथार्थे कर्तृत्वे असत्त्वेऽपि तस्मिन् कर्तृत्वं भासते। अस्मिन् प्रसङ्गे पुरुषः प्रेक्षक इत्युच्यते। तथोच्यते स पुरुषः शुद्धः, अचलः, आसक्तिरहितः, दुःखरहितः, कामरहितः द्रष्टा, कर्मफलभोक्ता इति।[45] सांख्यकारिकायामपि पुरुषस्य कृते 'प्रेक्षकवद्' इति पदस्य प्रयोगोऽभवत्।[46]

सांख्यसूत्रेऽपि अस्य पुरुषस्य कृते 'असङ्गः' इति पदस्य विशेषणत्वेन प्रयोगोऽभवत्। सांख्यकारिकायामपि पुरुषस्य अकर्तृत्वं निरूप्य तस्य गुणकर्तृत्वं निरूपितम्।[47] मैत्रायण्युपनिषद्येव अस्मिन् प्रसङ्गे भूतात्मा कर्तृत्वशक्तिसम्पन्न उच्यते। यथा लौहकारः अग्नितप्तं लौहं ताडयन् नानारूपं ददाति तथैव भूतात्मा गुणैः शासितः सन् अनन्तः भवति। अर्थात् त्रिगुणैः अनुषक्तः सन् भूतात्मा नानायोनिषु संचरति। एतदेव तस्याऽनेकत्वस्य स्वरूपम्। यथा कुम्भकारः चक्रात् भिन्नः तथैव गुणानां प्रेरकः आत्मा सर्वथा गुणेभ्यः पृथगेव। यथा लौहकारः तप्तं लौहपिण्डं ताडयति परन्तु कदापि अग्निं न ताडयति तथैव शुद्धः आत्मा सदा अविकारी एव तिष्ठति।

मैत्रायण्युपनिषदि ३/१-२ मन्त्रे जीवात्मनः विशेषवर्णनं विद्यते। जीवात्मनः एव अपरं नाम भूतात्मा, यतः स भूतसमूदाये स्थित्वा शुभाशुभकर्म करेति ततश्य तज्जन्यं सुखदुःखादिकर्मफलं भुनक्ति। यतः स भूतसमुदाये अस्यामुपनिषदि जीवस्य नानारूपाणि व्याख्यातानि। अस्याः उपनिषदः बहुत्र मुक्तपुरुषस्य तथा बद्धपुरुषस्य च वर्णनम् उपलभ्यते। पैङ्गलोपनिषदि प्रकृतौ पुरषप्रतिविम्बस्य सुचारु वर्णनमुपलभ्यते।एवञ्च उपनिषत्सु स्थलशः ईदृशेन वर्णनेन वक्तुं शक्यते यत् जीवात्मा ईश्वरात् पृथगेव।

**सन्दर्भ**


1. एष आत्मापहतपाप्मा विजरो विमृत्युविशोको विजिघत्सोऽपिपासः। छान्दोग्योपनिषद्, ८१५/१/
2. षोडशकलः सोम्य पुरुषः। छान्दोग्योपनिषद्, ६/१७/१
3. छान्दग्योपनिषद्, ६/११/३।
4. छान्दग्योपनिषद्, ६/३/२
5. श्वेताश्वतरोऽपनिषद्, ५/९
6. श्वेताश्वतरोनिषद्, १/६
7. नवद्वारे पुरे देही हंसो लेलायते बहिः। श्वेताश्वतरोपनिषद्, ३/१८
8. अनीश्चात्मा बध्यते भोक्तृभावात्। श्वेताश्वतरोपनिषद्, १/८
9. वृहदारण्यकोनिषद्, ४/३/१६
10. न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु सर्वं प्रियं भवति। बृहदारण्यकोपनिषरत् – २/४/२
11. संहतत्वाञ्च परार्थ्योपपत्तिः प्राणस्य। बृहदारण्यकोपनिषदः शाङ्करभाष्यम्, २/४५
12. ऋगवेदः, १/१६४/२०
13. योऽशनाया पिपासं शोकं मोहं जरां मृत्युमेति। वृहदारण्यकोऽपनिषद्, ३/५/१
14. गीता, २/२४
15. इहैवान्तः शरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडशकालाः प्रभवन्ति। प्रश्नोपनिषद्, ६/२
16. एष हि द्रष्टा-स्त्रष्टा-श्रोता-घ्राता-रसयिता-मन्ता-बोद्धा-कर्ता विज्ञानात्मा पुरुषः। प्रश्नोपनिषद्, ४/९
17. ज्ञाज्ञौ द्वावजीवशनीशवजी ह्येका भोक्तृभोग्यार्थयुक्ता।
18. महान् प्रभुर्वैः पुरुषः सत्त्वैष प्रवर्तकः।
19. सुनिर्मलमिमां प्राप्रिमीशानो ज्योतिरव्ययः॥ श्वेताश्वतरोपनिषद्, ३/१२
20. त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी।
21. त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः॥ श्वेताश्वतरोपनिषद्, ४/३

    (अ) य एकोऽवर्णो बहुधा शक्तियोगाद्वर्णाननेकान्निरतार्थो दधाति।
22. वि चैति चान्ते विश्वमादौ स देव स नो बुद्ध्या शुभया संयुनक्तु॥ श्वेताश्वतरोपनिषद्, ४/१
23. (आ) तदेवाग्निस्तदादित्यस्तद्वायुस्तञ्चन्द्रमा।

24. तदेव शुक्रं तद्ब्रह्म तदापस्तत् प्रजापतिः। श्वेताश्वतरोपनिषद्, ४२/
25. द्वा सुपर्णा सयुजा सखाया समानं परिषस्वजाते।
26. तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति॥ श्वेताश्वतरोपनिषद्, ४
27. यो योनिं योनिमाधितिष्ठ्यत्येको यस्मिन्निदं स च वि चैति सर्वम्।
28. तमीशानं वरदं देवमीड्यं निवाय्येमां शान्तिमत्यन्तमेति॥ श्वेताश्वतरोपनिषद्, ४/११

(अ) यच्च स्वभावं पचति विश्वयोनिः पाच्यांश्च सर्वान्परिणामयेद्यः।

29. सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान्विनियोजयेद्यः। श्वेताश्वतर, ५/५
30. (आ) आरम्य कर्माणि गुणान्वितानि भावांश्च सर्वान्विनियोजयेद्यः।
31. तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोऽन्यः।। श्वेताश्वतरोपनिषद्,६/४
32. गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता।
33. स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः॥ श्वेताश्वतरोपनिषद्५/७
34. स विश्वकृद्विश्वविदात्मयोनिर्शः कालकारो गुणी सर्वविद्यः ।
35. प्रधानक्षेत्रज्ञपतिर्गुणेशः स सारमोक्षस्थितिबन्ध हेतुः। श्वेताश्वतरोपनिषद्, ६/१६
36. साक्षीचेता केवलो निर्गुणश्च श्वेताश्वतरोपनिषद्, ६/११
37. नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।
38. तत्कारणं सांख्ययोगाधिगम्य ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ श्वेताश्वतरोपनिषद्, ६/१३
39. संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः। श्वेताश्वतरोपनिषद् १/८
40. किं कारणं ब्रह्म कुतः रम जाता, जीवाग केन तव च सम्प्रतिष्ठाः ।
41. अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्॥ श्वेताश्वतरोपनिषद् १/१
42. ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वागुणैर्निमूढाम्।
43. यः कारणानि निखिलानि तानि, कालात्मायुक्तान्यधितिष्ठत्येकः॥श्वेताश्वतरः, १/१
44. न जायते म्रियते वा विपश्चिन्नयं कुतश्चिन्न बभूव कश्चित्।
45. अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ कठोपनिषद्, १/२/१८
46. अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः।
47. देहाद्विमुच्यमानस्य किमत्र परिशिष्यते॥ कठोपनिषद्, २/२/४
48. यथोदकं शुद्धे शुद्धमासिक्तं तादृेव भवति
49. एवं मुनेर्विजानत आत्मा भवति गौतम॥ कठोपनिषद्, २/१/१५
50. पुरमेकादशद्वारमजास्यावक्रचेतसः।
51. अनुष्ठाय न शोचति विमुच्य विमुच्यते॥ कठोपनिषद्, २/२/१
52. हंस शुचिसद् वसुरन्तरिक्षसद् होता वेदिषद् अतिथिर्दुरोणसद्। कठोपनिषद्, २/२/२
53. कठोपनिषद्, १/३/४
54. अशब्दमस्पर्शमव्ययं तथा रसं नित्यगन्धवच्च यत्।
55. अनाद्यनन्तं महतः परं ध्रुवं.....कठोपनिषद्, १/३/१५
56. मुण्डकोपनिषद्, ३/१/१
57. प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
58. अप्रमत्तेन बोद्धव्यं शरवत्तन्मयो भवेत॥ मुण्डकोपनिषद्, २/२/४
59. मुण्डकोपनिषद्, २/२/६,
60. हृदयस्य मध्ये लोहितं मांसपिण्डं, यस्मिंस्तहरं येषु प्राणाः प्रतिष्ठाता। सुबालोपनिषद्, ४१/
61. अन्तः शरीरे निहितो गुहायामज एको नित्यः। सुबालोपनिषद्, ४/१
62. केनोपनिषद्, १/३
63. अमन्ताऽश्रोताऽस्प्रष्टाऽद्रष्टाऽवक्ताऽघ्रातारसयिता भवति। मैत्रायण्युपनिषद्, ६/११
64. स वा एष शुद्धः स्थिरोऽचलश्चलेस्योव्यग्रो निस्पृहः प्रेक्षकवदवस्थितः स्वस्थस्यमवृतः त्रिगुणमयेन पटेनात्मानमन्तर्धायावस्थितः। मैत्रायण्युपनिषद्, २/१११
65. प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः सुस्थः। सांख्यकारिका, ६५
66. गुणकर्तृत्वे च कर्तेव भवत्युदासीनः। सांख्यकारिका, २०
67. ऋग्वेदसंहिता (वङ्गानुवादः) – रमेशचन्द्रदत्तः, सुलभसंस्करणम्, देवीप्रसादचट्टोपाध्यायमणिचक्रवर्तीमहोदयाभ्याम् सम्पादितम्, ज्ञानभारती प्राइभेट लिमिटेड, कलि – १४ जुन्, १९६३।
68. ऐतरेयोपनिषद्, छान्दग्योपनिषद्, बृहदारण्यक्योपनिषद्, तृतीयं संस्करणम्,

महामोहोपाध्यायः (शङ्कराचार्यभाष्योपेतः) – श्रीयुक्तदुर्गाचरणसांख्यवेदान्ततीर्थेन अनुदितः सम्पादितश्च, देवसाहित्य कुटिर-प्राइभेट लिमिटेड।

69. उपनिषद्भाष्यम् – एस सुब्रह्मण्य शास्त्री (सम्पादकः), प्रथमः खण्डः, महेशानुसन्धानम्।
70. बृहदारण्यकोपनिषद् – आचार्यशङ्करकृतभाष्यम्, आनन्दगिरिकृतः टीका, दुर्गाचरणसांख्यवेदान्ततीर्थः (सम्पादकः), कलिकाता १३४० वङ्गाब्दः।
71. सांख्यदर्शनम्, भूपेन्द्रनाथभट्टाचार्यः, कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला, ग्रन्थाङ्कः – ४६, कलिः – १९६६
72. युक्तिदीपिका, यदुनाथत्रिपाठी शास्त्री, संस्कृतपुस्तकभाण्डारः।
73. वाचस्पतिमिश्रकृता, सांख्यतत्त्वकौमुदी, तारानाथाचार्येण सम्पादितम्, कलिकाता – १९८७